# 2020

## SANSKRIT — GENERAL

**Paper : GE/CC-3**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section - A**

**Unit - I**

**(Marks : 25)**

**1.** (a) अधोलिखितयो***रेकस्य*** मातृभाषया अनुवादः कर्तव्यः। 5×1

(i) ***सरसिजमनुविद्धं*** शैवलेनापि रम्यम्
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

(ii) गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायावद्धकदम्बकं मृगकूलं रोमन्थमभ्यस्यतु।
विश्रब्धं क्रियतां वराहततिभिर्मुस्ताक्षतिः पल्वले
विश्रामं लभतामिदं च ***शिथिलज्याबन्धम***स्मद्धनुः॥

(b) अधोलिखितेषु ***द्वयोः*** टीका संस्कृतभाषया देवनागरीलिपिमाश्रित्य लेखनीया। 5×2

सोमतीर्थः, प्रस्तावना, अनसूया, दुर्वासा।

(c) प्रसङ्गनिर्देशपूर्वकं ***कस्यैकस्य*** संस्कृतभाषया देवनागरीलिप्या च व्याख्या कार्या। 6×1

(i) कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके।
मृगानुसारिणं साक्षात् ***पश्यामीव*** पिनाकिनम्॥

(ii) विचिन्तयन्ती यमन***न्यमानसा***
तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स वोधितोऽपि सन्
कथां ***प्रमत्तः*** प्रथमं कृतामिव॥

**Please Turn Over**

(d) (i) विग्रहवाक्यमुल्लिख्य ***कस्यैकस्य*** समासनाम लेखनीयम् (संस्कृतभाषया देवनागरीलिप्या च)। 2×1
अनन्यमानसा 1(c)(ii) प्रश्ने, शिथिलज्याबन्धम् 1(a)(ii) प्रश्ने।

(ii) निम्नलिखितयोः ***कस्यैकस्य*** सन्धिविच्छेदः करणीयः (संस्कृतभाषया देवनागरीलिप्या च)। 1×1
सरसिजमनुविद्धम् 1(a)(i) प्रश्ने, पश्यामीव 1(c)(i) प्रश्ने।

(iii) निम्नलिखितयोः ***कस्यैकस्य*** व्युत्पत्तिनिर्णयं कुरु (संस्कृतभाषया देवनागरीलिप्या च)। 1×1
प्रमत्तः 1(c)(ii) प्रश्ने, अनुविद्धम् 1(a)(i) प्रश्ने।

## Section - B

## Unit - I

**(Marks : 15)**

**2.** (a) अभिज्ञानशकुन्तलनाटकस्य कस्मिन् अङ्के धीवरोपाख्यानं समवतारितम्? अनेनोपाख्यानेन नाटकीयं किमपि तात्पर्यं साधितं न वेति आलोच्यताम्। 2+8

***अथवा,***

अभिज्ञानशकुन्तलनाटकस्य कस्मिन् अङ्के दुष्यन्त-सर्वदमनयोः साक्षात्कारः अभवत्? कथं दुष्यन्तः क्रमेण तस्य पुत्रस्य परिचयं ज्ञातवान्? 2+8

(b) अधोलिखितयोर***ेकस्य*** मातृभाषया अनुवादः कर्तव्यः। 5×1

(i) एष त्वामभिनवकण्ठशोणितार्थी
शार्दूलः पशुमिव हन्मि चेष्टमानम्।
आर्तानां भयमपनेतुमात्तधन्वा
दुष्यन्तस्तव शरणं भवत्विदानीम्।।

(ii) रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुको भवति यत् सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमवोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि।।

## Section - C

## Unit - II

**(Marks : 10)**

**3.** अधोलिखितेषु विषय***द्वयम***वलम्ब्य टीका संस्कृतभाषया देवनागरीलिप्या च लेखनीया। 5×2

जनान्तिकः, आकाशभाषितम्, स्वगतः, अपवारितः।

## Section - D

## Unit - II

## (Marks : 15)

**4.** अधोलिखितेषु कस्यापि ***द्वयस्य*** टीका लेखनीया। 5×2

उत्तररामचरितम्, हर्षः, विशाखदत्तः, मृच्छकटिकम्।

**5.** अधोलिखितानां ***पञ्चानां*** प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च लेखनीयम्। 1×5

(a) अभिज्ञानशकुन्तलनाटकस्य विदूषकस्य नाम किम्?

(b) स्त्रीचरित्रवर्जितनाटकस्य नाम किम्?

(c) विक्रमोर्वशीयमिति दृश्यकाव्ये नायकः कः?

(d) रामायणमाश्रित्य भासविरचितस्य कस्यचिदेकस्य नाटकस्य नाम लिख्यताम्।

(e) महावीरचरितनाटकस्य रचयिता कः?

(f) रत्नावलीनाट्यकृतौ कति अङ्काः?

(g) अभिज्ञानशकुन्तलनाटकस्य प्रधानरसः कः?